RESEARCH REVIEW JOURNALS
Volume-02
Issue-06
June-2017

ISSN: 2455-3085 (Online)
RESEARCH REVIEW International Journal of Multidisciplinary
www.rrjournals.com [UGC Listed Journal]

# चार्वाकमतनिदर्शनम्: अथ दार्शनिकपृष्ठभूमिः

ऋषिकेश मीना

व्याख्याता राजकीय शास्त्री संस्कृत महाविद्यालय चेचक (कोटा)

'अलिविलासिसंलापे' नामके महाकाव्ये सर्वदर्शनसंग्रहः विद्यते। अलिविलासिनोः परस्परं वादविवादे क्रमेण दर्शनानां चर्चा विहिता वर्तते, अत्र अलिः सर्वदा अद्वैतं मतमेव प्रस्तौति, विलासी च भिन्नं भिन्नं मतम् आश्रयति आदौ चार्वाकमतं प्रस्तौति तद्यथा– हे! मित्र! अद्वितीये नववयसि राजश्रेष्ठैः धनादिरहितैः दरिद्रैरपि सममेव सेव्यमानान् विषयान् स्वकीयया जडमत्त्या कथं त्यजसि? नीति विना अमुं परित्यज्य आकाशे (नयशून्ये) त्वं कुत्र गमिष्यसि? हे द्विरेफ! मम अमृततुल्यानि वचनानि श्रृणु विषयानुभवं विना गात्रेदं व्यर्थम्, असौ कायः स्थिरः नास्ति। कुत्सितबुद्धिमान् (वेदान्तादिषु शास्त्रेषु प्रतिपादितस्य ब्रह्मारिपरलोकजस्य सुखस्य इच्छुकः) कथं अमुं तिरस्कोति। गात्रातिरिक्ते सा चेतना कुत्र? सर्वे जनाः शरीरगतमेव सा चेतना इति स्वीकुर्वन्ति, शरीराद् भिन्ना कुत्र सा चेतना? सा तु दृढतर–अनुपलब्धिना हतोऽस्ति, 'दुःखेन समन्वितकारणात् सुखं त्यजतु' वञ्चकाः एवं वदन्ति, बहून् यत्नान् विना भोजनं कुत्र मिलति? तं भोजनं त्यक्त्वा न कश्चन नरः जीवति। यः उदरपूर्तये धावति, तद्भिन्नस्य सुखस्य उपेक्षां करोति। सः जनः स्वस्य आलस्यम् अथवा मूर्खत्वं प्रदर्शयति। स्वस्य बुद्धेः निर्मलतायाः अथवा भ्रमस्य परीक्षणं बहुजनसिद्धमार्गेण भवति, भुवने कृषकाद् समारभ्य बुद्धिजनपर्यन्तं सर्वे जनाः गात्रस्य सुखायैव क्रियाः कुर्वन्ति, अतः शरीरसुखमेव सर्वोत्तममिति मत्वा आनन्दं प्राप्नुयाद्, लोके सर्वे शरीरसुखमेव मुख्यं सुखमिति आमनन्ति।[1] ज्ञानेदं इन्द्रियाद् जन्यमबाधितञ्चास्ति, साम्प्रतम् त्वम् अस्य ज्ञानस्य उपेक्षां करोषि, तथा च धूर्तनां मठाधिपानाम् अविश्वस्तेषु वाक्येषु विश्वासं श्रद्धाञ्च करोषि। अयं वृत्तान्तः महतः आश्चर्यस्य। इन्द्रियाद् जायमानस्य ज्ञानस्य कारणतां विना तस्य आत्मनः किञ्चिद् प्रमाणं नास्ति। चक्षुरादि–इन्द्रियाद् जायमानेन ज्ञानेन सिद्धः स आत्मा, स्वस्य साधकस्य ज्ञानस्य बाधनाय उद्यतो भवति। अतः तस्मिन् कथं विश्वासः कुर्यात्, चेत् त्वं समस्तेषु वैषयिक–सुखेषु दुःखमेव पश्यसि? तर्हि आत्मसुखेऽपि अस्य सत्ता अङ्गीकार्या। सुखे यत् सुखत्वं धर्मः सः आत्मसुखे वैषयिकसुखे च समानमेव वर्तते, अतः नियमः आगतः यत् यत्र सुखत्वं भवति, तत्र दुरूखत्वमपि भवत्येव, इत्थं प्रकारेण सुखसामान्यकारणेन आत्मसुखमपि दुःखेन युक्तमस्ति। नियमस्य सार्वत्रिकत्वात्। आत्मसुखे चेत् दुःखत्वं न स्वीक्रियते, तदा नियमस्य व्यभिचारः स्यात्। चेत् त्वं शरीरस्य विनाशित्वाद् अभीष्टस्य सुखस्य भोगं न करोषि, तर्हि सद्यः अस्य सुखं भोगं कुरु यतः गात्रस्य वैयर्थ्य न स्यात्।[2] चेत् त्वं सुखरहिते आत्मनि परमं दुःखराहित्यमवगत्य तस्य ज्ञाने रतोऽसि, तर्हीदं उचितं नास्ति। इदमसुखत्वमेव आत्मनः न्यायविदं दूरीकरोति, बुद्धिमन्तः खलु निष्प्रयोजनं कार्यं न कुर्वन्ति। श्रमं विना नित्यसुखस्य भोगाद् जनानां चेतसि अरूचिः भविष्यति। कटुरसं विना नैरन्तर्येण भोजयमाना शर्कराऽपि न रोचते। मूर्ख! सुखीजनानां समाजेन सह समागमनेन लज्जायाः अनुभविकः स्वयं सुखस्य उपार्जनाय मात्सर्ययुक्तः चौर एव एकान्ते निवासं चिकीर्षति। अस्माकं सम्प्रदाये बहुभिः दृष्टफलैः युक्ता षड्गुणनाम् धरित्री न्यायज्ञस्यैव उक्तिः प्रामाणिकी भवति। तव संशयेप्सितफलदायकः तथा च यस्य वक्ता एव दृश्यते तस्य वेदस्य वचनेषु किमर्थम् अनुरागः? हे मित्र! उत्पन्ने सति कथितैः उपायैः दुःखान् परिहरन् सुखस्य भोगं कुरु।[3] अन्यथा आगच्छन्तं दुःखं वहतु। न्यायवेत्तारः भीरवः न भवन्ति। वीरश्रेष्ठपुङ्गवः क्रुद्धो भूत्वा पादाभ्यामेव गजाश्वव्याप्तेषु युद्धेषु शत्रूणां शिरांसि छिन्दन्ति। सः अरीणां शस्त्रसमूहेन हानि न पश्यति, तथा च पृथिव्यामेव अत्यानन्दं प्राप्नोति। युवा नानाभिः उपायैः मदेन चञ्चलनेत्रवत्यः कामिन्यः मनः वशीकर्तुं प्रभवति। तथा प्रसन्नं स्मितञ्च भवन् कामिन्याः आलिङ्गनं कृत्वा . देवेन्द्रादपि (अथवा शतक्रतुभिः) अधिकं सुखमनुभवति।

हे अले! उपायरूपेण नीतिः समादरं कुर्वन् तस्याः फलवत्तया कामशास्त्रे आदरं कुरु, तथा फलं प्राप्नुहि। अन्यथा स्वर्गादिफलेच्छया वने विचरन् नक्ष्यसि। परमेश्वरः भूप एव इति स्वीकरोषि। सः राजा सज्जनान् रक्षति। तथा च दुर्जनान् विनश्यति, मरणमेव मोक्षः, कामार्थो पुरुषार्थः इन्द्रियजन्यं प्रत्यक्षमेव प्रमाणम्, चत्वारि तत्त्वानि– पृथिव्यप्तेजोऽनलवायुरिति। भौतिककारणैः जायमाना पीड़ा एव नरकजन्यं दुःखम्, तथा च प्रणवयुक्ता अंगना एव स्वर्गजन्यं सुखमस्ति। किण्वराशौ मदशक्तिवत् काये स्वभावतः चेतना वसति। सा कायोपचयो तस्य नष्टे स्वयमेव विनश्यति। अत एव आत्मज्ञान–विषयकेषु श्रुतिवचनेषु विश्वासः हितकरः नास्ति। एवम्प्रकारेण बार्हस्पत्यदर्शनस्य सततचिन्तनात् हिताहितयोः निर्धारणं मया कृतमिति। तथा च सुखमनुभूतं त्वयि अलि मदीयः सखिभावः अस्ति, अत एव सकल–वृत्तान्तं कथयामि त्वया दत्तावधानेन उपासना विधेया।[4]

एवम्प्रकारेण अलिः चार्वाकमतमुपस्थाप्य तं समर्थितवान् अतः परं विलासिनः इमानि वचनानि आकर्ण्य तस्य मतस्य खण्डनाय एवम् अब्रवीत्– हे! विलासिन्! चेतना शरीरमात्रस्य आश्रयं कृत्वा न भवति, चेतना तु सर्वव्यापिका वर्तते, किन्तु विषयेऽस्मिन् अज्ञाः विवादं जनयन्ति। चेत् चेतना बहिः इति न स्वीक्रियते तदा बाह्यवस्तूनां संस्पर्शं विना इयं विषयसमूहं कथं प्रतिभासयति। यतो हि शरीरस्य लोके चन्द्रमसः च आकाशे स्थितत्वात्। स्वयं प्रकाशस्वरूपात्मैव बाह्य–वस्तूनां प्रकाशनं करोति, यदि सा चेतना विषयानां सन्निकर्षं विना तं प्रतिभासते, तर्हि संसारस्य सर्वे विषयाः कथन्न भासिताः भवन्ति, चेतना इन्द्रियाणां सन्निकर्षासन्निकर्षयोः भेदेन ज्ञानं नियमयति। यस्मात्

© RRIJM 2015, All Rights Reserved

वस्तुनः सन्निकर्षः समुपजायते, चितिः तं प्रकाशते, तथा असिन्नकृष्टवस्तुनं न प्रकाशते। एवम्प्रकारेण गात्राद् बहिरेव चेतनेति स्वीकर्तव्या। यदि नेत्ररश्मिभिः चन्द्रस्य सन्निकर्षे द्रष्टुः गात्रे ज्ञानोत्पन्नं स्वीक्रियते तदा तु तेन चन्द्रमसि एव वर्तितव्यम् न तु काये यदि ज्ञानरूपात्मकस्य फलस्योत्पत्तिः गात्रे मन्यते तदा फलहेत्वीः वैयधिकरण्यं संभेवत् सन्निकर्षरूपहेतोः चन्द्रमसि सत्त्वात्, फलहेत्वोः सामानाधिकरण्यं भवति। 'अहं चन्द्रविषयकज्ञानवान्' इत्याकारक व्यवहारं सर्वे कुर्वन्ति। अस्य व्यवहारस्यापलापः कश्चन अपि कर्तुं न शक्यते, तत्र कायस्य निमित्तकारणतायाः सत्त्यपि शरीरे ज्ञानस्योत्पत्तिः न सम्भवति, तत्र कार्यस्योत्पत्तिः निमित्तकारणे न भवति, अपितु समवायिकारणे भवति। अत एव घटोत्पत्तिः कुलालस्य शरीरे न भवति।[5] अतः आत्मा नित्यः सर्वव्यापी अस्ति। तस्याग्रहणस्य कारणम् आवरणरूपा अविद्या वर्तते, लोकेऽस्मिन् येन आवरणं दूरीभवति, तस्मिन् आत्मा स्फुरति, आवृत्ते सति तस्य स्फुरणं न भवति, यस्य ग्रहीतुं न इच्छति, त्यागस्यापि इच्छा समाप्ता, विधिना प्राप्तस्य विषयस्य उपेक्षापूर्वकमनुभवकर्ता परमं सुखं प्राप्नोति। निर्विवादरूपेणामुं तथ्यं स्वीकुरु। चित्सुखमत्यन्तं दुर्लभं, तस्य समाधिना प्राप्तिकारणत्वाद् तथा च वैषयिकसुखं सुलभं, तस्य सारल्येन प्राप्तिकारणत्वाद्, एवं वादेषु किमपि प्रमाणं नास्ति, एतादृशैः विचारैः अवबद्धः असत्यविकल्पात्मकसागरेषु पातितो भवति, सः किञ्चिदपि न प्राप्नोति, यदि देहसुखस्य कामनया बलात् मनसि विश्रान्तिं वाञ्छसि, तर्हि तस्य देहसुखस्य प्राप्तये क्रियमाणैः शतकार्यैः स्थिरो भव स्वदेहसुखस्य इच्छां रक्ष,। तस्मादेव सुखं मिलिष्यति, तथा च त्वं श्रान्तोऽपि न भविष्यसि, देहसुखेच्छया कृतैः प्रयासैः कष्टमेव सञ्जायते, यदि सुखस्य साधनरूपे शरीरे कृतज्ञस्सन् अधिकं सुखं प्राप्तुं चेष्टते तर्हि त्वं सुखितां एव पीडयसि। तथा च एवं सति तव कृतघ्नता सिद्ध्यति, चेत् भाविसुखसमूहस्य तृष्णया प्राप्तस्य सुखस्य तिरस्करोषि, तथा च तं प्रत्यक्षं सुखं त्यक्त्वा अनुमानसिद्धा दृष्टं प्रति धावति तर्हि धिक् त्वं स्वमतं न त्यजसि? अतीन्द्रियं (अनुमानगम्यं) अधिकफलप्राप्तिकामनया त्वं स्वधान्यं भूमौ वपसि। अतः अनुमितेः प्रमात्वस्य निराकरणं तव मूर्खतां प्रदर्शयति, अधिकफलस्य प्राप्तेः या त्वदीया कामना सा अनुमानगम्या नास्ति इति कथम्? चेत् त्वम् उत्कटसंशयस्य कारणेन स्वस्य अन्नागारस्य अन्नं भूमौ वपसि तर्हि शान्तेः आश्रयणं कुरु संशयपूर्विका या क्रिया सा यदा–कदा एव फलवती भवति, किन्तु क्रियायां शान्त्यनुभावः नियत एव, संशयापन्नो व्यक्तिः फलस्यानिश्चयादेव कार्य सम्पादयति।[6] चेत् त्वं शरीरस्य सुखापेक्षया मानसिकं सुखमधिकं मन्वसे तर्हि तदपि उचितं नास्ति, यतो हि– इन्द्रियसमूहै मनः दर्शनविषयत्वाभावात्, तस्य शब्दप्रमाणेन अनुमानेन वा ज्ञानं न सम्भवति, तव मते उभेऽपि प्रमाणे नास्तः, अतः प्रत्यक्षातिरिक्तं प्रमाणेन सिद्धाः विषयाः तव मते भवितुमर्हन्त्येव नहि। प्रसंगेऽस्मिन् चेत्त्वं मनसः प्रत्यक्षतानिर्धारणाय शरीरगतस्य यस्य कस्यचिद् अङ्गस्य मनस्त्वेन स्वीक्रियते, तदपि । उचितन्नस्ति, शरीरस्य बहूनामङ्गानां ज्ञानेन सुखेन च अन्वयो भवति, तथा बहुषु अङ्गेषु तस्य व्यतिरेकः भवति अतः कमपि अङ्गविशिष्टं मनः इति स्वीकृत्य तस्य प्रात्यक्षं साधयितुं न शक्यते, उपर्युक्तं आपत्तिं दूरीकरणाय चेत् त्वं सकलेषु शरीराङ्गेषु सुखज्ञानयोः सत्तां मनुषे, तदपि उचितन्नास्ति, लोके दृश्यते यथा–कस्यचिद् जनस्य अङ्कस्य व्यपगते सत्यपि सः जनः चेतनां प्राप्नोति जीवति च, अतः अनेन पक्षेण मनसः प्रात्यक्षं सभवितुं नार्हति। चेत् त्वं पृथक–पृथक् शरीरगतानाम् अवयवानां चेतनतां स्वीकरोषि, तदपि उचितन्न, एवं स्वीक्रियमाणे स्व–स्व इष्टसिद्धया भिन्न–भिन्नदिक्षु गम्यमानेषु अङ्गेषु परस्परं वैरमापतति। अस्मद्–सिद्धान्ते एकैव चेतना अङ्गान् नियमयति, अतः द्वेषस्य अवसरः न भवति, किन्तु तव मते अंगानां स्वातन्त्र्येण सापि तेषां विनिवारणाय न शक्ष्यति।[7] चिरकालं यावत् कृतेऽपि परीक्षणे अङ्गोपरि गात्रस्य कुत्रचिदपि मुख्यता न सिद्धयति, तद्यथा शरीरस्य एकस्मिन् भागे दुःखमनुभवन् अपि अपरस्मिन् भागे सुखस्यानुभवो भवति, अतः शरीरस्य मनः अंगविशेषं मत्त्वा तस्य प्रत्यक्षसिद्धावपि कश्चन लाभः नास्ति, गात्रस्य एकस्मिन् भागे सुखे सत्यपि अपरत्र सुखन्नास्ति, तस्माद् कारणात् परस्परं विरुद्धसिद्धान्तानां समागमनेन शरीरे चेतनायाः अभावः वर्तते। शरीराद् भिन्नमेव सुखदुःखयोः कश्चन भोक्ता अस्ति। सैव ऋषिभिः शास्त्रकृद्भिश्च पुरुषः अथवा 'चेतन' पदेन व्यवह्रियते। त्वं स्वकीयैः उद्यमैः फलप्राप्तिकुर्वन्तं नीतिविदं दृष्ट्वा फलप्राप्तिं अनुमिनोषि, अत एव स्वकीयं गात्रं कार्यसम्पादने समर्पयसि, फलं भविष्यति इति सुचिन्त्य साम्प्रतं कार्य करोषि, अर्थात् फलम् अनुमिनोषि, अत्र स्पष्टरूपेणानुमानं समागतम्, तत्तु त्वया स्वीकृतमेव अत एव भवता, न केवलं प्रत्यक्षं अपितु अनुमानमपि स्वीकर्तव्यमेव, प्रत्यक्षमात्रमेव प्रमाणमिति तव पक्षः युक्तियुक्तः न प्रतिभाति, अतः अनुमितिः प्रमैव वर्तते। त्वं स्वकीये गात्रे सुखं मनुषे, किन्तु सुखस्य प्राप्त्यनन्तरमपि पृथिव्यां कष्टप्रदायकानि कार्याणि करोषि, स्वकीयाय शरीराय कष्टं प्रददन् स्वकीयमेव सिद्धान्तं खण्डयसि, भवान् शरीराय कष्टं दत्त्वा चिरकालं यावत् स्थिरकीर्त्तये किमर्थ प्रयतते? इत्येव महदाश्चर्यस्य विषयः। भवतः कार्यस्यास्य विषये इम एव पक्षाः विचारणीयाः वर्तन्ते। वस्तुतस्तु शरीरसुखमात्रमेव तव इष्टं नास्ति, अपितु तदतिरिक्तं कीर्त्यादिकमपि इच्छसि, अतः तव मतेऽपि अनुमानमत्यावश्यकम् अस्ति।[8] अस्मिन् संसारे ये जनाः चिरकालं यावत् यशादिकम् इच्छन्ति, तेषां मनसा, वचसा, परिश्रमेण, धनेन च जीवनस्य समर्पणभावो भवति, तत्र शारीरिकरूपोद्यमं दुःखम् अनिवार्य भवति, त विना इष्टसिद्धिः कदाचिदपि न संभवति त्वम् एतादृशानि कार्याणि संवाद्य स्वयमेव दुःखपरम्पराणां वरणं करोषि तस्मात् स्वकीयं सिद्धान्तं खण्डयसि। त्वद्रीत्या शरीरसुखमेव प्रमुखं वर्तते, न तु तद्कष्टम्, त्वद्रीया शरीरमेव चेतना इति पक्षः, एवञ्च शरीरस्य विनष्टे चेतनायाः विनाशः संभवति, तथा च चिरकालं यावत् यशादिक भवेत् इति इच्छया श्रमकर्तारः यशः नानुभवन्ति, अतः परेषां गुणकीर्तनेन को लाभः?

इत्थं तव कीर्तिलालसा निष्फला एव, अतः त्वयापि चेतनायाः नित्यता स्वीकरणीया। चेत् तवाभिमतं चेतनं शरीरस्य विनाशानन्तरमपि परेषां सुखस्य गुणानाञ्च प्रशंसया आनन्दं प्राप्नोति, तदा तच्चेतनं चिरकालं यावत् यशादिकं स्थितये चिदात्मसुखाय दुःखमपि तत्रापि अनुमितिः आवश्यकी, अत एव सर्वविधप्रमाणेषु अनुमान श्रेष्ठमस्ति, इदं तथ्यं त्वया निर्विवादपुरस्सरं स्वीकरणीयम् इत्थमेव देहस्य नाशानन्तरमपि आत्मनः सत्ता भवत्येव, तथा च चिदात्मसुखं शरीराधीनं न भवति, इति सर्व त्वया अवधारणीयम्, अहम् अत्र अमुं रहस्यं तुभ्यं ज्ञापयामि, यत् इन्द्रियजन्यं ज्ञानं तदिन्द्रियफलरूपेण गृहीतो भवति, किन्तु अनुमितिः समस्तसंसारस्य हिताहितयोः विवेके आदृता भवति।

© RRIJM 2015, All Rights Reserved

प्रत्यक्षज्ञानेन सकलस्य जगतः हिताहितविवेको न सम्भवतीति। अतः सकलस्य जगतः हिताहितयोः विवेके कारणीभूता बलवती अनुमितिः स्वकीय–गुणैः नियमतः अनुपलब्धिं वारयति। प्रत्यक्षप्रमाणेन स्वर्गादयः अनुपलब्धिविषयाः भवन्ति, किन्तु अनुमानेन तु सिद्धिः समुपजायते। अन्यथा कश्चन जनः आपणे स्वकीय पुत्रं अदृष्ट्वा कथं न रोदति, अर्थात् सः जनः गृहे पुत्राः कुशलिनः सन्ति इत्यनुमानेन सन्तुष्यति। तत्र अनुपलब्धेः अनुमानेन बाधो भवति।[9] चेत् त्वं अनुमितौ साध्यस्य व्यवधानाद् तत्र बाह्यगुणैः सिद्धये योग्यता नास्ति इति मनुषे? तर्हीदं व्याख्यानम् उचितन्नास्ति, वस्तुवस्तु आत्मा नित्यो वर्तते स्वप्रकाशश्च वर्तते, तदर्थमनुमानं नाङ्गीकार्यम् 'अहम् अस्मि' रूपेण तस्यानुभवः प्रत्यक्षं जायते, तस्माद् आत्मतत्त्वसिद्धये अनुमानस्यावश्यकता नास्ति, किन्तु तदतिरिक्तं वर्तत एव भो! चार्वाक्![10]

**सन्दर्भ**


1. चार्वाकदर्शनम्, 2 अध्याय
2. सर्वदर्शनसंग्रहः–चार्वाकमतनिरूपणम्
3. सर्वदर्शनसंग्रहः–चार्वाकमतनिरूपणम्
4. तैत्तरीयोपनिषद् 2.1
5. सर्वदर्शनसंग्रहः–चार्वाकमतनिरूपणम्
6. चार्वाकदर्शनम्, 2 अध्याय
7. सर्वदर्शनसंग्रहः–चार्वाकमतनिरूपणम्
8. सर्वदर्शनसंग्रहः–चार्वाकमतनिरूपणम्
9. चार्वाकदर्शनम्, 2 अध्याय
10. तैत्तरीयोपनिषद् 2.1


© RRIJM 2015, All Rights Reserved